ह्लादस्तथा। संह्लादपुत्रः सुन्दश्च निसुन्दश्चैव तावुभौ। ह्लदस्य पुत्रो ह्यायुर्वै शिविः कालस्तथैव च। विरोचनश्च प्राह्लादिर्बलिर्जज्ञे विरोचनात्। बलेः पुत्रशतन्त्वासीद्बाणज्येष्ठं नराधिप। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः। कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः। वाणस्तेषामतिबलो ज्येष्ठः पशुपतिप्रियः। पुराकल्पे हि वाणेन प्रसाद्योमापतिं प्रभुम्। पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः। वाणस्य चेन्द्रदमनो लोहित्यामुदपद्यत। गणास्तथा सुरा राजन् शतसाहस्रसम्मिताः। हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः। झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा। महानाभश्च विक्रान्तः कालनाभस्तथैव च। अभवन्। दनुपुत्राश्च शतं तीव्रपराक्रमाः। तपस्विनो महावीर्य्याः प्राधान्येन निबोध तान्। द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिराः प्रभुः। शङ्कुकर्णो विराधश्च गवेष्ठो दुन्दुभिस्तथा। अयोमुखः शम्बरश्च कपिलो वामनस्तथा। मरीचिर्म्मघवांश्चैव इरा गर्गशिरा वृकः। विक्षोभणश्च केतुश्च केतुवीर्य्यशतह्रदौ। इन्द्रजित्सर्व्वजिच्चैव वज्रनाभस्तथैव च। महानाभश्च विक्रान्तः कालनाभस्तथैव च। एकचक्रो महाबाहुस्तारकश्च महाबलः। वैश्वानरः पुलोमा च विद्रावणमहाशिराः। स्वर्भानुर्वृषपर्व्वा च तुहुण्डश्च महासुरः। सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः। असिलोमा च केशी च शठश्च बलको मदः। तथा गगनमूर्द्धा च कुम्भनाभो महासुरः। प्रमदो मयश्च कुपथो हयग्रीवश्च वीर्य्यवान्। वैरूपः स विरूपाक्षः सुपथोऽथ हराहरौ। हिरण्यकशिपोश्चैव शतमायश्च शम्बरः। शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान्। एते सर्व्वे दनोः पुत्राः कश्यपादभिजज्ञिरे। विप्रचित्तिप्रधानास्ते दानवाः सुमहाबलाः। एतेषां यदपत्यन्तु न तच्छक्यं नराधिपः। प्रसंख्यातुं महीपाल! पुत्रपौत्रमनन्तकम्। स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयम्। उपदानवी हयशिराः शर्म्मिष्ठा वार्षपर्व्वणी। पुलोमा कालका चैव वैश्वानरसुते उभे। बह्वपत्ये महावीर्य्ये मारीचेस्तु परिग्रहः। तयोः पुत्रसहस्राणि षष्टिं दानवनन्दनान्। चतुर्द्दश शतानन्यान् हिरण्यपुरवासिनः। मारीचिर्ज्जनयामास महता तपसाऽन्वितः। पौलोमाः कालकेयाश्च दानवास्ते महाबलाः। अबध्या देवतानाञ्च हिरण्यपुरवासिनः। कृताः पितामहेनाजौ निहताः सव्यसाचिना। प्रभाया नहुषः पुत्त्रः सृञ्जयश्च शचीसुतः। पूरुं जज्ञेऽथ शर्म्मिष्ठा दुष्मन्तमुपदानवी। ततोऽपरे महावीर्य्या दानवास्त्वतिदारुणाः। सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा। दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः। सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः। वंशः शल्यश्च बलिनौ नभश्चैव महाबलः। वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा। आञ्जिको नरकश्चैव कालनाभस्तथैव च। राहुर्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः। शुकः पोतरणश्चैव वज्रनाभश्च वीर्य्यवान्। मूकश्चैव तुहुण्डश्च ह्लादपुत्त्रौ बभूवतुः। मारीचः सुन्दपुत्त्रश्च ताड़कायां व्यजायत। एते वै दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः। तेषां पुत्त्राश्च पौत्त्राश्च शतशोऽथ सहस्रशः। संह्लादस्य तु दैत्यस्य निवातकवचाः कुले। समुत्पन्नाः सुमहता तपसा भावितात्मनः। तिस्रः कोट्यः सुतास्तेषां मणिमत्यां निवासिनाम्। तेऽप्यबध्याश्च देवानामर्ज्जुनेन निपातिताः। षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिताः"। "वासेन यस्य जनिताऽसुरभीरणश्रीः" नैष०। "समत्सरेणासुर इत्युपेयुषा" माघः। "ततः कानीयसा एव देवा ज्यायसा असुराः, य एषु लोकेष्वस्पर्द्धन्त ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति" छा०उ० "असुषु विषयविषयासु प्राणनक्रियासु रमन्ते रम—ड। ४स्वाभाविक्यां तम आत्मिकायामिन्द्रियवृत्तौ। "देवासुरा वै यत्र संयेतिरे" वृ०उ०। देवाश्चासुराश्च देवादीव्यतेर्द्योतनार्थस्य रूपं शास्त्रोद्भासिता इन्द्रियवृत्तयः। असुरास्तद्विपरीताः स्वेष्वेवासुषु विषयविषयासु प्राणनक्रियासु रमणात् स्वाभाविक्यस्तम आत्मिका इन्द्रियवृत्तय एव" भा०। स्वार्थे प्रज्ञा० अण् आसुरः तत्रार्थे। तस्येदम् अण् आसुरः तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् "आसुरीरात्रिरन्यत्र तस्मात्ताः परिवर्ज्जयेत्" स्मृतिः "आसुरीं योनिमापन्नाः" गीता। हितार्थे यत्। असुर्य्यः। "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः" कठ०उ० सुरा सुधा ग्रहीतत्वेनास्त्यस्य अर्श० अच् न०त०। "सुराप्रतिग्रहाद्देवाःसुरा इत्यभिश्रुताः। अप्रतिग्रहणात्तस्या दैतेयाश्चासुराः स्मृताः" इत्युक्तनिर्व्वचनादपि तेषामसुरत्वम्। जातौ ङीप् असुरी "असुरी जिह्वा देवानां प्रातः सवनमत्वालेट्" अथ०। ४कांस्ये तस्यासुराह्वयत्वात्तथात्वम्। मेघे पु० निरु०। [रक्षणीये।

**असुरक्ष** त्रि० सुखेन रक्ष्यते सु+रक्ष-खल् न०त०। सुखेना-

**असुरराज्** पु० असुरेषु राजते राज् क्विप् ७त०। प्रह्लाद-